श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री करुणाकराचार्यस्वामिना विरचितम्

# ॥ श्रीपराङ्कुशदशोत्तरशतनामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीपराङ्कुशदशोत्तरशतनामस्तोत्रम् ॥

श्रीवत्सवंशकलशोदधिकौस्तुभस्य
श्रीवासराघवगुरोस्तनयं ततश्च।
विद्या अवाप्य विबुधोत्तमतां दधानं
कुर्वे सदा हृदि गुरुं करुणाकराख्यम् ॥

प्रपन्नजनसन्तानकूटस्थः परमाद्भुतम्।
पाण्ड्यदेशसमुद्भूतः कुरुकानगरीश्वरः ॥ 1 ॥

ताम्रपर्णीतटासक्तिः द्राविडाम्नायसूतिभूः।
कारिभूपतनूजातः स्वामिनीकुक्षिभूषणम् ॥ 2 ॥

अतिसुन्दरदेहश्रीपरिपूर्णस्य भूमिका।
महावराहदीर्घाक्षिपातलब्धमहोदयः ॥ 3 ॥

जायमानकटाक्षाप्तविकासिमतिमण्डितः।
तिरस्कृतशठश्श्रीमान् शठारिर्ब्रह्मणो बृहत् ॥ 4 ॥

अपीताम्बास्तनक्षीरः आकाश इव निर्मलः।
आदिनाथपुरः प्राप्तशिशुशय्याब्जषद्वदः ॥ 5 ॥

अस्वापतिन्त्रिणीवृक्षकोटरान्तरवस्थितः।
कृष्णतृष्णामयो मारः कृतिनामीश्वरो गुणी ॥ 6 ॥

यथार्थशठजित्सञ्ज्ञः जयादस्मन्मनस्ततेः।
पूतनापतिसङ्क्लृप्तपञ्चसंस्कारसंस्कृतिः ॥ 7 ॥

सरोयोगिवचः क्लृप्तदीपभासुरमानसः।
महसद्द्रमिडश्रीमद्भूतयोगिवचोरतः ॥ **8** ॥

महदाह्वयसन्दृष्टदंपती शरणं व्रजन्।
भक्तिसारमहारत्ननिवासनगरीरतः ॥ **9** ॥

मधुराख्यकवीशश्रीमानसाम्बुजभास्करः।
कुलशेखरराजेन्द्रशिरोभूषणपद्मपत् ॥ **10** ॥

मङ्गलाशासनसक्तभट्टनाथसृतिप्रसूः।
गोदास्वयंवराहूतसमस्तार्चादशाहरिः ॥ **11** ॥

भक्ताङ्घ्रिरेणुसङ्गीतजीवत्स्वलससन्ततिः।
मुनिवाहनभोगार्यमार्गदर्शकवाक्ततिः ॥ **12** ॥

निजाम्नायषडङ्गानां प्रणेत्रा कविना स्तुतः।
चतुर्वेदमयान् दिव्यान् प्रबन्धान् चतुरो दधत् ॥ **13** ॥

उपकारस्मृतिपूर्वनिजवृत्तसुवर्णनः।
संसारदुस्सहत्वोक्तिपरस्स्वादिमवाङ्मयः ॥ **14** ॥

नाथस्वरूपभोगाढ्यद्वितीयग्रन्थभासुरः।
हरितृष्णाभिवृद्धीड्यतृतीयग्रन्थगायकः ॥ **15** ॥

यथेष्टफलसंप्राप्तिवर्णनान्तिमवाङ्मयः।
मैत्रेयभूतनिजसत्प्रेमसञ्चोदितेरणः ॥ **16** ॥

दृप्तसङ्घकवीशानमक्षिकाविनतात्मजः।
वीथिकापतदुच्छिष्टभोजने शुनि मोक्षदः ॥ **17** ॥

संसारशमने स्पर्धां प्रभुणाऽपि दधत् प्रभुः।
वकुलाभरणो वाग्मी पराङ्कुशमुनीश्वरः ॥ **18** ॥

परवादिमदालापभञ्जनो विमलाशयः।
तुरीयमुखपादेन तृणीकृतमृषामतः॥ 19॥

प्रकटच्छन्नबौद्धाख्यमदवारणवारणः।
नाथसौशील्यचिन्ताप्तनिजषण्मासमूर्च्छनः॥ 20॥

नवनीतनटाहारनवनीतातिभोगदः।
नैच्यवाग्विरहाशङ्काभयकृद्द्वयनाशनः॥ 21॥

नायिकाभावनामूलं चतुर्थ्यर्थमतिं दधत्।
जननीभावनावाक्यैर्नमः पदमतिं दधत्॥ 22॥

वयस्याभावनावाक्यैः प्रणवार्थमतिं दधत्।
मूलमन्त्रार्थदो मूकः द्वयव्याख्यानतत्परः॥ 23॥

वेङ्कटाचलदेवेशचरणाम्बुजसन्निधिः।
तोताद्रीश्वरपादाब्जसाधनत्वकथारतः॥ 24॥

अपर्याप्तामृताह्वानप्रविद्धमुनिमानसः।
मणिवर्णसमाह्वानविलापितमहीरुहः॥ 25॥

मेघसुन्दररङ्गेशपादपङ्केरुहाश्रयः।
आरामाद्रिरमामुग्धभूमिकान्तरपेशलः॥ 26॥

निजदेहरतं देवं शपथेन निवारयन्।
देहत्यागं विना मुक्तिर्नेति शास्त्रस्य रक्षकः॥ 27॥

हरिसङ्कल्पविज्ञानजेतृतत्कामनायुतः।
सविभूतिकसर्वेशमहाभोगसुखान्वितः॥ 28॥

सामानाधिकरण्याङ्कवचसाऽद्वैतशिक्षकः।
अपर्याप्तामृताह्वानजीवितद्रामिडागमः॥ 29॥

रङ्गनाथमुनीशानमानसांबुजभास्करः।
योगेऽपरोक्षतामेत्य द्रमिडागमसङ्घदः॥ 30 ॥

श्रीमद्यामुनयोगीशस्तोत्ररत्नगपत्स्तुतिः।
पराशरादिवाग्भ्योऽपि परात्मरतिदायिवाक्॥ 31 ॥

धात्रीभूतयतीशानलालितस्ववचस्ततिः।
पदत्राणपदारूढभाष्यकृद्विग्रहोज्ज्वलः॥ 32 ॥

भविष्यत्गुरुतायुक्तभाष्यकृद्विग्रहप्रदः।
कुरुकेशसुधीक्लृप्तटीकाभूषितवाङ्मयः॥ 33 ॥

श्रीवत्साङ्कितगोविन्दवर्णितार्थात्मवाक्ततिः।
श्रीमद्वरदविष्णवार्यविष्णुचित्तादिसेवितः॥ 34 ॥

श्रीभट्टारकशिक्षाढ्ययोगिवर्णितभाववाक्।
वरदार्यवचोजातमहाटीकाभिगुप्तगीः॥ 35 ॥

श्रीमत्कृष्णसुधीशानव्याकृतीडितवाक्ततिः।
वादिकेसरिसंक्लृप्तपदयोजनयाऽढ्यगीः॥ 36 ॥

श्रीमद्वेङ्कटनाथोक्तभावरस्यादिपद्यकः।
तात्पर्यरत्नसङ्घाख्यभूषणोज्ज्वलवाङ्मयः॥ 37 ॥

वेदान्ताचार्यसञ्ज्ञातसारदर्शितसारवाक्।
आचार्यहृदयव्याख्यासूक्तिभूषितवाङ्मयः॥ 38 ॥

श्रीजामातृमुनिप्रोक्तगाथाशतगसारवाक्।
परकालयतीशानव्याख्ययाढ्यवचोगणः॥ 39 ॥

दशोपनिषदां भाष्यं दात्रा व्याकृतवाक्ततिः।
साक्षात्स्वामिवचोगुप्तनिधिचारुवचश्चयः॥ **40** ॥

नानाटीकाभिसंसेव्यनवगम्भीरवाक्ततिः।
श्रीमद्वेङ्कटशेषार्यसंस्कृतीकृतवाङ्मयः॥ **41** ॥

कलिकल्मषकालोऽस्मत्सूरिरित्यभिसन्नुतः।
शठकोपमुनीट्द्वारा हयसृष्ट्यादिनर्मकृत्॥ **42** ॥

अहंबुद्धिस्तुतिर्गीशः प्रह्लादसमताङ्गतः।
स्वप्रबन्धारतेऽपीशपादुकात्वेन सङ्गदः॥ **43** ॥

स्वावासतिन्त्रिणीलम्बदिव्यदेशततीश्वरः।
सुदुर्लभतया पार्थसूतवर्णितमातृका॥ **44** ॥

नायिकासुषमायुक्तकुरुकापूस्थविग्रहः।
सौन्दर्यतातनगरे सदर्थं कृतसन्निधिः॥ **45** ॥

दशोत्तरशतं नाम्नां शठारेरित कल्पितम्।
कविश्रीनिधिसूरीन्द्रतनयेन सतां मुदे॥ **46** ॥

॥ इति श्रीपराङ्कुशदशोत्तरशतनामस्तोत्रं समाप्तम्॥